2008

श्रीः ।

वेदांतसंज्ञा ।

वेरीनिवासिगौडवंशोद्भवद्विजशाल-
ग्रामात्मजपंडितजसतिरामश-
र्मजीविरचित

भाषाटीकासहित ।

जिसको
मुमुक्षुजनोंके लाभार्थ ।

खेमराज श्रीकृष्णदासनें
मुम्बाई
स्वकीय 'श्रीवेंकटेश्वर' छापाखानेमें
छापकर प्रसिद्ध किया ।

आषाढ सं० १९५२ वि०

इस पुस्तकके सर्व हक्क प्रकाशकनें स्वाधीन रक्खेहैं ।

BHARATIYA VIDYA BHAVAN
S. N.
LIBRARY

भारतमित्र का उपहार।

कलकत्ता।

१८००।

चंद्रांतकंजा।

[illegible]

[illegible]

[illegible]

भाषाटीकासहित।

[illegible]

[illegible]

इस पुस्तकके सर्व हक यंत्रालयाधिपनें स्वाधीन रक्खेहै।

श्रीः ।

सूचनेयम् ।

वेदान्तसंज्ञेति नामकोयं ग्रंथः पुरातनोऽशुद्धश्च लब्धः ततो रोहतक इति पदवाच्य राजधान्यन्तर्गत बेदरी (बेरीति) नगरनिवासिना गौडवंशोद्भव द्विजशालिगरामात्मज पण्डित वसाति रामशर्मणा बहु श्रमेण संशोधितः टिप्पणिकाभिरलंकृतश्च तदनंतरंतेनैव मया नृगिराऽनुवादितः इति

सर्वजनोंको मालूम होवे कि यह वेदान्तसंज्ञा नामक ग्रंथ आज तक किसी छापाखानामें मूलमात्र भी नहीं छपाहै यह ग्रंथ गुप्त होरहाथा बहुतसे मुमुक्षुजनों की अपेक्षासे जिलारोहतक कसबे बेरी निवासि शालग्रामात्मज पंडितवस्तीरामजीकेद्वारा हिंदुस्थानी सरलभाषामें टीका रचनाकराय प्रकाशितकी है इस छोटेसे ग्रंथके देखनेसेही वेदान्तके मतको जानेंगे और पंचदशी आदिबड़े ग्रंथोंको समझ सकेंगे इस लिये एकवार देखनेही योग्य यह अपूर्व ग्रंथ तयार भयाहै इसका संपूर्ण अधिकार हमने स्वाधीन रक्खा है ॥

सज्जनोंका कृपाभिलाषी—

खेमराज श्रीकृष्णदास

"श्रीवेंकटेश्वर" छापाखाना—मुंबई.

श्रीगणेशाय नमः ।

अथ वेदांतसंज्ञा ।

श्लोकः ।

श्रीमद्गुरोः पादयुगं नत्वा तस्य प्रसादतः ॥
वेदांतसंज्ञाः प्रत्येकं निरूप्यंते यथामति ॥ १ ॥

भा०—अथ मंगलाचरण दोहा—मतिको जो निश दिन लपै, मतिसे लषा न जाय॥ताहि सच्चिदानंद कूं, प्रति दिन सीस नवाय॥१॥ भाषाटीका रचतहूं निजबुद्धीअनुसार, भूलचूक काहिं होयतो पंडित लेहि संभार॥२॥ श्लोकार्थः- श्रीमद्गुरुके दोनों चरणोंको नमस्कार करिके तिसगुरुके प्रसादसे वेदांत-संज्ञा यथामति बुद्धिके अनुसार निरूपण करते हैं ॥ १ ॥

अध्यारोपाऽपवादाभ्यां निष्प्रपंचं प्रपंच्यते इति वृद्ध-वचनादत्राऽध्यारोपो नाम वस्तुन्यवस्त्वारोपः। वस्तु सच्चिदानन्दात्मकं ब्रह्म। अवस्तु अज्ञानादि-सकलजडसमुदायस्वरूपमहाप्रपंचः॥

भा०—अध्यारोप और अपवादन्यायकरके निष्प्रपंच जो ब्रह्म है अर्थात् पंचतत्वोंके विकारोंसे रहित जो ब्रह्म है तहाँ पंचतत्व आचरण करिये है पंचतत्व दिखाई देते हैं; जैसे रज्जुमें सर्पादि तैसे, ऐसा यह वृद्ध-वचन है। यहां अध्यारोप नाम वस्तुविषे अवस्तुका आरोपण। वस्तु सत् चित् आनंदरूप ब्रह्म है, अवस्तु अज्ञानसे आदिलेके सकल जडसमुदाय-स्वरूप महाप्रपंच है तिस महाप्रपंचका आरोपण वस्तुसच्चिदानन्दमें होरहा है रज्जुमें सर्प, शुक्तिमें रजत, स्थाणूमें पुरुष इत्यादिकोंकी तरह यहां असत्य समझना यह अपवाद है इति।

प्रपंचद्वयम् १ अज्ञानद्वयं २ सूक्ष्मशरीरद्वयं ३ स्थूल-शरीरद्वयं ४ शक्तिद्वयं ५ निःश्रेयसद्वयं ६ संशयद्वयम् ७ असंभावनाद्वयं ८ विपरीतभावनाद्वयं ९ प्रज्ञाद्वयं १० समाधिद्वयम् ११ ॥

भा०-प्रपंच दोहैं १ अज्ञान दोहैं २ सूक्ष्म शरीर दोहैं ३ स्थूल शरी दोहैं ४ शक्ति दोहैं ५ निःश्रेयस दोहैं ६ संशय दोहै ७ असंभावना दों ८ विपरीतभावना दोहैं ९ प्रज्ञा दोहैं १० समाधि दोहै ११ इनसबोंकें स्पष्टकरकै आगे लिखेंगे इति ।

ब्रह्मत्रयं १ जीवत्रयं २ शरीरत्रयम् ३ अवस्थात्रयं ४ कारणत्रयम् ५ कर्मत्रयम् ६ पुण्यकर्मत्रयं ७ पापकर्म्मत्रयम् ८ मिश्रकर्मत्रयं ९ प्रारब्धत्रयम् १० प्रतिबंधत्रयम् ११ संबंधत्रयम् १२ तापत्रयं १३ अध्यात्मिकत्रयम् १४ करणत्रयम् १५॥ गुणत्रयं १६ कालित्रयम् १७ मूर्तित्रयं १८ ज्ञानादित्रयं १९ प्रपंचत्रयं २० लोकत्रयं २१ ज्ञानप्रतिबंधकत्रयं २२ वासनात्रयं २३ श्रवणादित्रयं २४ ज्ञानादित्रयं २५ हेत्वादित्रयं २६ प्राणायामत्रयम् २७ आध्यादित्रयं २८ तादात्म्यत्रयम् २९ एषणात्रयम् ३० सुषुप्त्यादित्रयम् ३१ ॥

भा०-ब्रह्म तीन है १ जीव तीन हैं २ शरीर तीन हैं ३ अवस्था तीन है ४ कारण तीन है ५ कर्म तीन हैं ६ पुण्यकर्म तीन हैं ७ पापकर्म तीन है ८ मिश्रकर्म तीन हैं ९ प्रारब्ध तीन है १० प्रतिबंध तीन हैं ११

संबंध तीन हैं १२ ताप तीन हैं १३ अध्यात्मादि तीन हैं १४ करण तीन हैं १५ गुण तीन हैं १६ काल तीन हैं १७ मूर्ति तीन हैं १८ ज्ञानादि तीन हैं १९ प्रपंच तीन हैं २० लोक तीन हैं २१ ज्ञानप्रतिबंधक तीन हैं २२ वासना तीन हैं २३ श्रवणादि तीन हैं २४ ज्ञानादि तीन हैं २५ हेत्वादि तीन हैं २६ प्राणायामादि तीन हैं २७ आध्यादि तीन हैं२८तादात्म्यादि तीन हैं २९ एषणा तीन हैं ३० सुषुप्तिआदि तीन हैं ३१।

वर्तमानप्रतिबंधचतुष्टयम् १ पुरुषार्थचतुष्टयम् २ शब्दप्रवृत्तिचतुष्टयम् ३ वर्णचतुष्टयम् ४ आश्रमचतुष्टयम् ५ साधनचतुष्टयम् ६ अंतःकरणचतुष्टयम् ७ अनुबंधचतुष्टयम् ८ संकल्पादिचतुष्टयम् ९ वेदचतुष्टयम् १० प्रमाणचतुष्टयम् ११ विघ्नचतुष्टयम् १२ मैत्रादिचतुष्टयम् १३ भूतग्रामचतुष्टयम् १४ ब्रह्मविद्याचतुष्टयम् ॥ १५ ॥

भा०—वर्तमान प्रतिबंध चार है १ पुरुषार्थ चार है २ शब्दप्रवृत्ति निमित्त चार है ३ वर्ण चार है ४ आश्रम चार है ५ साधन चार है अनुबंध चार है ७ अंतःकरण चार है ८ संकल्पादि चार है ९ वेद चा है १० प्रमाण चार है ११ विघ्न चार है १२ मैत्रीआदि चार है १ भूतग्राम चार है १४ ब्रह्मविद्या चार है इन सबोंको स्पष्ट करके आ लिखेंगे इति ॥

कोशपंचकम् १ ज्ञानेन्द्रियपंचकं२शब्दादिपंचकं३ कर्मेंद्रियपंचकम् ४ वचनादिपंचकम् ५ प्राणादिपंचकम् ६ उपवायुपंचकं ७ कर्मपंचकं ८ सूक्ष्मभूतपंचकं ९ स्थूलभूतपंचकं १० यमपंचकं ११

नियमपंचकं १२ भूमिकापंचकं १३ प्रलयपंचकं १४ भ्रमपंचकं १५ निवर्तकदृष्टांतपंचकं १६ दृष्टांतपंचकं १७ ख्यातिपंचकम् १८ इति ॥

भा०-पंच कोश है अर्थात् शरीरमें खजाने पांच है १ ज्ञानइंद्री पांच है २ शब्दादि पांच है ३ कर्मइंद्री पांच है ४ वचनादिक पांच है ५ प्राण पांच है ६ उपप्राण पांच है ७ कर्म पांच है ८ सूक्ष्मभूत पांच है ९ स्थूलभूत पांच है १० यम पांच है ११ नियम पांच है १२ भूमिका पांच है १३ प्रलय पांच है १४ भ्रम पांच है १५ निवर्तक दृष्टांत पांच हैं १६ दृष्टांत पांच है १७ ख्याति पांच है १८ इति ।

समाधिषट्कम् १ अरिषड्वर्गः २ षड्भावविकाराः ३ षट्कौशिकाः ४ षडूर्म्मयः ५ षड्विधलिंगानि ६ षडवस्थाः ७ षट्शास्त्राणि ८ षट्सूत्राणि ९ षडंगानि १० षट्कर्माणि ११ शमादिषट्कम् १२ ॥ इति ।

भा०-समाधि छह है १ वैरी छह है २ भावविकार छह है ३ कौशिक छह है ४ लहरी छह है ५ लिंग छह प्रकारके है ६ अवस्था छह है ७ शास्त्र छह है ८ सूत्र छह है ९ अंग छह है १० कर्म छह है ११ शमादि छह है १२ इति ।

सप्ताऽवस्थाः १ सप्तचैतन्यानि २ भूतादिसप्तकम् ३ अतलादिसप्तकम् ४ सप्तभूमिकाः ५ ॥

भा०-अवस्था सात है १ चैतन्य सात है २ भूतादि सात है ३ अतलादि सात लोक है ४ भूमिका सात है ५ इति ।

पुर्य्यऽष्टकम् १ प्रकृत्यऽष्टकम् २ अष्टांगानि ३ अष्टांगः ४ ॥

भा०-पुरी आठ हैं १ प्रकृति आठ है २ अंग आठ है ३ अष्टांग योग है ४।

नवविधसंसारः १ देवतापंचदशकम् १ अस्थ्यादिपंचदशकम् २॥

भा०-संसार नव प्रकारका है १ देवता पंदरह है १ अस्थिआदि पंदरह है २ इति।

युगादिषोडशकं १ षोडशकंलिंगं २ सप्तदशकं लिंगम् ३ नवदशकं लिंगं ४ चतुर्विंशतिस्तत्वानि षट्त्रिंशत्तत्वानि षण्णवस्तितत्वानि॥

भा०-युगादि सोलह है १ सोलह लिंग है २ लिंग सतरहभी है ३ लिंग उन्नीस है ४ तत्त्व चौबीश है छत्तीश तत्त्व हैं छियानवें तत्त्व है।

परमहंससंन्यासद्वयं १ विद्वत्संन्यासद्वयं २ निग्रहद्वयम् ३ अहंकारद्वयम् ४ आनंदत्रयं जाग्रत्त्रयं स्वप्नत्रयम् सुषुप्तित्रयं आत्मत्रयम् ५ संन्यासचतुष्टयं १ भूमिकाचतुष्टयं २ युक्तिचतुष्टयम् ३ अजिह्वादिषट्कं १ मौनादिसप्तकं १ नाडिकादशकं नाडिदेवतादशकम् अष्टांऽतरंगमदाः षड्बहिर्मदाः अष्टमूर्तिमदाः अष्टपाशाः १ सप्तधातवः १ सप्तव्यसनानि २ षड्भ्रमाः १

भा०-परमहंसोंके पद दो है १ विद्वानोंके संन्यासदो है २ निग्रहदो है ३ अहंकारदो है ४ आनंद तीन है १ कर्म तीन है २ जाग्रत् तीन है ३ स्वप्न तीन है ४ सुषुप्ति तीन है ५ आत्मा तीन है ६ संन्यास चार है १ भूमिका चार है २ युक्ति चार है ३ अजिह्वादि छह है १ मौनादिक सात है १ नाडी दशप्रकारकी है १ नाडीयोंके देवता दश है २ आठ

भीतरके मद है १ छह बहिर्मद है२आठ मूर्तियोंके मद है २ आठ फांसी है २ सात धातु है १ सात व्यसन है १ छह भ्रम है १ ।

पंचक्लेशाः १ आध्यात्मिकतापत्रयम् १ स्वर्गलोकतापत्रयम् २ पंचसप्ततिर्गुणाः १ रूपषट्कम् स्पर्शचतुष्टयम् १ ॥

भा०—पांच क्लेश है १ आध्यात्मिक आदि ताप तीन है १ स्वर्गलोकके ताप तीन है १ पिछत्तर गुण है १ रूप छह है १ स्पर्श चार है ।

शब्दद्वयम् १ रसषट्कम् १ गंधद्वयं १ नववर्णाः ऐश्वर्य्यादिषट्कम् १ उत्पत्त्यादिषट्कम्१नादादित्रयम् १ इत्येताः संज्ञाः शास्त्रज्ञैरुदाहृताः एताः प्रत्येकं निरूप्यंते ॥ इति ।

भा०—शब्ददो है १ छह रस है १ गंधदो है १ वर्ण नव है १ छहऐश्वर्य्य आदि है १ उत्पत्ति आदि छह है १ नाद तीन है ये इतनी संज्ञा शास्त्रके जानने वालोंनें कही है ये संज्ञा एक एकके प्रति निरूपण करी जाती है—इति ॥

सदऽसद्भ्यामनिर्वचनीयम् त्रिगुणात्मकं ज्ञानविरोधि अहमज्ञः मोहित इत्यनुभवबलात् भावत्वेन व्यपदेशरूपमज्ञानंमूलकारणत्वात् सत्वरजस्तमोगुणानां साम्यावस्थारूपत्वाच्च मूलप्रकृतिः प्रलयावस्था अव्यक्तम् व्याकृतं महासुषुप्तिः कूटं। निर्विकारेण तिष्ठतीति कूटस्थंज्ञानं विना न क्षरतीति अक्षरमितिव्यपदिशंते। स्थूलसूक्ष्मकारणप्रपंचानां समष्टिमहाप्रपंचः॥

भा०—जो सत्य अरु असत्यइन दोनुवोंसे विलक्षण होवे न साचाहै न झूठा है साच झूठसे न्यारा है। तीनों गुणोंका आत्मा है ज्ञानका विरोधी है मैं अज्ञहूं मोहकूं प्राप्त होरहा हूं इस अनुभवबलसे होने करिके विपरीत रूप है उसको अज्ञान कहते है क्यों कि मूलका कारण होनेसे अरु सत्वरजतमोगुणोंका समरूप होनेसे अज्ञानको मूल प्रकृति भी कहते हैं प्रलयाऽवस्था कहते है इसीकूं अव्यक्त कहते हैं अव्याकृत भी कहते हैं महासुषुप्ति भी इसीकूं कहते है ज्ञान विना जो नष्ट नहीं होवे इसलिये अक्षर भी अज्ञानको ही कहते है ऐसा व्यपदेश कहा है स्थूलसूक्ष्म कारण इन प्रपंचोंका जो समष्टि समग्र समूह है उसको महाप्रपंच कहते हैं—इति ॥

बाह्यप्रपंच आंतरप्रपंच इति प्रपंचद्वयम्।पृथिव्यादि पंचमहाभूतानि तज्जन्यो ब्रह्मांडस्तदंतर्भूतोपर्युपरि विद्यमानभूर्भुवः स्वःमहर्जनस्तपःसत्यंनामकाऽधोऽधोविद्यमानाऽतल,वितल, सुतल, तलातल, महातल, रसातल, पाताल, नाम चतुर्दश भुवनानि तन्निष्ठजरायुजांडजस्वेदजोद्भिज्जचतुर्विधभूतग्रामसमुदायः यथायोग्यं विविधनामरूपगुणधर्मशक्त्याश्रयः बाह्यप्रपंचः ॥ इति।

भा०—बाह्य प्रपंच और आंतर प्रपंच ऐसे दोप्रकारका प्रपंच है तिसको स्पष्ट करिकै दिखाते हैं।पृथिवीसे आदिलेके जो पंचभूत हैं तिन्होंसे उत्पन्न हुवा ब्रह्मांड ब्रह्माडके अंतरभूत जो उपरि उपरि विद्यमान भूर्लोक भुवः लो०स्वः लो०महर्लो०जन लो०तपः लो०सत्य लोक है अरु इन्हके नीचे नीचे जो अतल वितल सुतल तलातल महातल रसातल पाताल नामक लोक ऐसे जो चतुर्दश भुवन हैं तिन विषे जो जरायुज अंडज स्वेदज उद्भिज्ज अर्थात् जेरसे अंडासे पसीनासे चोमासासे होने वाला चार प्रकार

का भूतग्राम समुदाय है. जैसा जैसा विविध प्रकारका नाम रूप गुण ध
शक्तिके आश्रय जो हो रहा है सो बाह्य प्रपंच कहा जाता है-इति ।

अन्नमयादिपंचकोशस्थूलादिशरीरत्रयाऽस्तीत्या-
दिषड्भावविकारत्वङ्मांसादिषट्कौशिकाऽशनापिपा-
सादिषडूर्मिश्रोत्रादिज्ञानेंद्रियपंचकवागादिकर्मेंद्रि-
यपंचकप्राणादिवायुपंचकंमनआद्यंतःकरणचतुष्ट-
यम् ॥ संकल्पाद्यंतःकरणवृत्त्यवस्थात्रयतद्व्या-
पारतदभिमानिविश्वतैजसप्राज्ञसमाधिमूर्छाकरण-
त्रयम् कामक्रोधाद्यरिषड्वर्गं साधनचतुष्टयसत्वा-
दिगुणत्रयम् सुखदुःखज्ञानाऽज्ञानादिपंचक्लेशमै-
त्र्यादिचतुष्टययमाद्यष्टांगप्रत्यक्षादिप्रमाणचतुष्टय-
रोगारोग्यादिसमुदायः यथायोग्यं विविधनामरूप-
गुणधर्मशक्त्याश्रयः आंतरप्रपंचः इति विवेकः ॥

भा०-अन्नमय आदिक जो पंचकोश अन्नमय १ प्राणमय २ मनो-
मय ३ विज्ञानमय ४ आनंदमय स्थूलआदि तीन प्रकारके शरीर अ-
स्ति, जायते, वर्द्धते, विपरिणमते, अपक्षीयते विनश्यति ऐसे ये षड्भाववि-
कार अर्थात् छह प्रकारके होने वाले विकार त्वचासे आदिलेके छह कोश
त्वचा १ मांस २ मज्जा ३ रक्त ४ अस्थि ५ वीर्य ६ ये है और अशना-
दिक अर्थात् क्षुधा पिपासा आदि छह ऊर्मी नाम लहरी श्रोत्रसे आदि पंचज्ञान
इंद्री वाक्से आदि पंचकर्मइंद्री प्राणसे आदिलेके पंचवायु मनसे आदि
चार अंतः करण मन बुद्धि चित्त अहंकार संकल्पादि अंतःकरणकी वृत्ति
की जाग्रत् स्वप्न आदि तीन अवस्था तीनोंके व्यापार तिन्होंके अभिमानी
विश्वतैजसप्राज्ञ समाधि मूर्च्छा । तीन करण कामसे आदि अरिषड् वर्ग-
चार साधन सत्व आदि तीन गुण दुःख आदि पांच क्लेश चार मैत्र्यादि

यमसे आदि अष्टांग, चार प्रत्यक्ष आदि प्रमाणरोग आरोग्यादि समुदाय जैसा तैसा अनेक नाम रूप गुण धर्म शक्तिके आश्रय जो है सो सब आंतर प्रपंच कहा है ऐसा विवेक है इति ॥

समष्ट्यज्ञानं व्यष्ट्यज्ञानमिति अज्ञानद्वयम् अज्ञानस्यसमष्ट्यभिप्रायेणैकत्वव्यपदेशः व्यष्ट्यभिप्रायेण नानाव्यपदेशः समष्ट्यज्ञानमीश्वरोपाधिः उत्कृष्टोपाधितया विशुद्धसत्वप्रधानामाया अखिलकारणत्वात् कारणशरीरम् आनंदप्रचुरत्वात् कोशवदात्मन आच्छादकत्वाच्चानंदमयकोशः सर्वोपरमत्वात्सुषुप्तिः अतएव समष्टिस्थूलसूक्ष्मशरीरत्वस्थानमितिचोच्यते व्यष्ट्यज्ञानं जीवोपाधिः इयं व्यष्टिर्निकृष्टोपाधितयामलिनसत्वप्रधानाऽविद्या अहंकारादिकारणत्वात् कारणशरीरमानंदप्रचुरत्वादेवहेतोः कोशवदात्मन आच्छादकत्वाच्चानंदमयः कोशः सर्वोपरमत्वात्सुषुप्तिः अतएव व्यष्टिस्थूलसूक्ष्मशरीरलयस्थानमितिचोच्यते इति ॥

भा०—समष्टि अज्ञान अरु व्यष्टि अज्ञान ऐसे दो प्रकारका अज्ञान है. अज्ञानकों समष्टिअभिप्राय करके एक कहा जाता है, व्यष्टिअभिप्रायसे अज्ञानकू नाना कहते है अर्थात् अनेक कहतेहैं ईश्वरकी उपाधीकूं समष्टि अज्ञान कहते है उत्तम उपाधि करिके तहां विशुद्धसत्व गुणप्रधानवाली माया है इसी मायासहित अज्ञानकूं अखिल अर्थात् सभीका कारण होनेसे कारण शरीर कहते है आनंद जादे होनेसे कोश नाम म्यानकी तरह अर्थात् जैसे तलवारको म्यान ढकलेता है तैसे आत्माकूं ढकनेसे तहां आनंदमय कोश रहता है. सब इंद्रीमन आदिका उपराम होनेसे सुषुप्ति

अवस्था है इसी वास्ते समष्टिके स्थूल१सूक्ष्म२ इन दोनों शरीरोंका लय स्थान है इति । जीवउपाधीकूं व्यष्टि अज्ञान कहते है यह व्यष्टि अल्प उपाधिता करिकै मलिनसत्त्व प्रधान अविद्या है, अहंकारादिकोंका कारण होनेसे कारण शरीर रहता है विशेष आनंदका हेतु होनेसे कोश म्यानकी तरह आत्माको ढकनेसे आनंदमयकोश कहाता है सभीका उपराम होनेसे सुषुप्ति अवस्था है इसी वास्ते व्यष्टिके स्थूल और सूक्ष्म शरीरका लयस्थान है ऐसे कहा जाता है ॥ इति ॥

समष्टिसूक्ष्मशरीरं व्यष्टिसूक्ष्मशरीरमिति सूक्ष्मशरीरद्वयम् . अखिलसूक्ष्मशरीरमेकबुद्धिविषयत्वेनवनवज्जलाशयवद्वा समष्टिः अनेकबुद्धिविषयतया वृक्षवज्जलाशयवद्वा व्यष्टिश्च भवति यत्समष्टिकारणशरीरतयाऽज्ञोपाधिभूतमखिलं सूक्ष्मशरीरं हिरण्यगर्भोपाधिः विज्ञानमयादिकोशत्रयं जाग्रत् वासनामयत्वात् स्वप्नः अतएवसमष्टिस्थूलप्रपंचलयस्थानमिति चोच्यते ॥

भा०—समष्टि सूक्ष्म शरीर व्यष्टि सूक्ष्म शरीर ऐसे दो सूक्ष्म शरीर है, संपूर्ण जो सूक्ष्म शरीर है तिनको एक बुद्धिविषयता करिके वनकी तरह वा जलाशय समुद्रकी तरह होवै उसको समष्टि कहे है अर्थात् बहुत वृक्ष है परंतु वनबुद्धि एकविषयता है अरु प्रति वृक्ष भिन्न २ बुद्धि करना यह अनेक बुद्धिविषयता कहलाती है सोव्यष्टिके लक्षणमें जानना अनेक विषयता करिकै वृक्षकी तरह जलोंकी तरह जो होवै उसकों व्यष्टि कहते हैं जो समष्टि कारणशरीर ता करके अज्ञ उपाधिभूत है संपूर्ण सूक्ष्म शरीर है उसको हिरण्यगर्भोपाधि कहते हैं तहां विज्ञानमय आदि तीन कोश है अर्थात् विज्ञानमयः मनोमयः प्राणमयः जाग्रत् वासनामय अर्थात् जाग्रत् वासना प्रधान होनेसे स्वप्न अवस्था है इसी वास्ते समष्टिके स्थूल प्रपंच लय होनेका स्थान है ऐसा कहा जाता है इति ।

पूर्वोक्तव्यष्टिकारणशरीरतया अज्ञोपाधिभूतं सकलं सूक्ष्मशरीरम्अनेकबुद्धिविषयतया व्यष्टिसूक्ष्मशरीरं तैजसोपाधिभूतं विज्ञानमयादिकोशत्रयम अत एव व्यष्टिस्थूलप्रपंचलयस्थानमिति चोच्यते इति ॥

भा०-पूर्वोक्त जो व्यष्टि कारणशरीर है तिस करिके अज्ञ उपाधिभूत अर्थात् मैं कछु नहीं जानता हूं ब्रह्मज्ञानरहित जो सब सूक्ष्म शरीर है सो अनेक बुद्धिविषयता करिके अर्थात् प्रति शरीर भिन्न २ समझके व्यष्टि सूक्ष्म शरीर कहलाते हैं सो तैजसकी उपाधि है तहां विज्ञानमय आदि तीन कोश हैं इसीवास्ते व्यष्टिके स्थूल प्रपंच अर्थात् स्थूलशरीर का लयस्थान है ऐसें कहा जाता है-इति ।

समष्टिस्थूलशरीरं व्यष्टिस्थूलशरीरमिति स्थूलशरीरद्वयम् जरायुजांडजस्वेदजोद्भिज्जाख्यं च चतुर्विधं सकलं स्थूलशरीरं वनवज्जलाशयवद्वा एकबुद्धिविषयत्वात्सूक्ष्मशरीरापेक्षया स्थूलत्वाच्च समष्टिस्थूलशरीरं विराडुपाधि अन्नविकारत्वात्कोशवदात्मन आच्छादकत्वाच्च अन्नमयकोशः स्थूलभोगायतनत्वाज्जाग्रदिति चोच्यते इति ॥

भा०-समष्टिस्थूलशरीर व्यष्टिस्थूलशरीर ऐसे दो प्रकारके स्थूल शरीर है. जरायुज, अंडज, स्वेदज, उद्भिज्ज, अर्थात् जेरसे अंडासे पसीनासे चमांसे चारप्रकारसे संपूर्ण स्थूल शरीर होते है तिन्होंको, वनकी तरह जलाशयपसमुद्रकी तरहहै व एकबुद्धिविषयता होनेसे अर्थात् जैसे अनेक वृक्षहै तो भी वन एक ही है अनेक जलोंका समुद्र एकही है ऐसे सबजीवोंका एकता समझनेंसे सूक्ष्म शरीरकी अपेक्षा करके स्थूल होनेसे समष्टि स्थूल शरीर कहते है सोविराट् उपाधि है अन्नका विकार होनेसे कोशकी तरह

आत्माकूं ढकनेसे अन्नमय कोश कहते हैं स्थूल भोगोंका आयतनस्थानहोनेसे जाग्रत् कहते हैं–इति ।

पूर्वोक्तं चतुर्विधं स्थूलशरीरं सकलं वृक्षवज्जलाशयवद्वा अनेकबुद्धिविषयतया सूक्ष्मशरीरापेक्षया स्थूलत्वाच्च व्यष्टिस्थूलशरीरं विश्वोपाधिः अन्नविकारत्वाद्धेतोरेवात्मनः कोशवदाच्छादकन्यायाच्च अन्नमयकोशः स्थूलभोगायतनत्वाज्जाग्रदिति चोच्यते-इति ।

भा०–पूर्वोक्त जो चार प्रकारका स्थूल शरीर ताको वृक्षकी तरह वा जलाशयकी तरह होनेसे अनेक बुद्धिविषयता करके अर्थात् प्रतिशरीर भिन्न २ बुद्धिसे विचारके देखनेसे और सूक्ष्म शरीरकी अपेक्षा करके स्थूल होनेसे व्यष्टि स्थूलशरीर कहते हैं सोविश्व उपाधि है अन्नविकारहेतु होनेसे आत्माकूं कोशकी तरह ढकनसे अन्नमयः कोशकहते हैं स्थूल भोगोंका आयतन स्थानहोनेसे जाग्रत अवस्था कहते हैं–इति ।

आवरणशक्तिर्विक्षेपशक्तिरिति शक्तिद्वयम् ॥ अंतर्दृगदृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोर्भेदं वा स्वात्माऽवलोकयित्रीं बुद्धिं अखंडसच्चिदानंदं वा आवृणोतीत्यावरणशक्तिः ॥ १ ॥

भा०–आवरण शक्ति और विक्षेपशक्ति ये दोप्रकारकी शक्ती हैं तहां आवरण शक्तिकूं कहते हैं कि जोभीतरदृग् अर्थात् दृष्टि अरु दृश्यका भेद, बाहर जोब्रह्म अरु सर्गका भेद सो, स्वात्मावलोकयित्री अपनें आत्माको दिखानेवाली ब्रह्मविद्यायुक्त जो बुद्धि तिसको अथवा अखंड सच्चिदानंद ब्रह्मको जो ढकले वे उसकूं आवरणशक्ति कहते हैं ॥

विविधस्वरूपेण भवनं विक्षेपशक्तिः ॥

भा०–प्र०विक्षेपशक्ति किसको कहते हैं उ० अनेक स्वरूप करिके जो होवे उसकूं विक्षेप शक्ति कहते हैं ॥

अनर्थनिवृत्तिरानंदप्राप्तिश्चेति निःश्रेयसद्वयम् ॥ प्रमाणगतसंशयः प्रमेयगतसंशयश्चेति संशयद्वयम् ॥ तथाहि श्रुतिभिः कर्म बोध्यते उत सिद्धब्रह्म प्रतिपाद्यतेइत्येवंरूपा चित्तवृत्तिः प्रमाणगतसंशयः १ ॥

भा०—अनर्थकी निवृत्ति अरु आनंदकी प्राप्ति ये दो निश्रेयसहै संशय दोप्रकारके है एकतो प्रमाणगत संशय है दूसरा प्रमेयगत संशय है तथा हि—सो कहतेहै—श्रुतिकर्मकूं बोधन करतीहै अथवा क्या श्रुतियोंसे सिद्ध ब्रह्म प्रतिपादन किया जाताहै ऐसी चित्तकीवृत्ति होनेकूं प्रमाणगतसंशय कहतेहै ॥

ब्रह्म जगत्कारणं उत प्रधानादिकमित्येवं रूपाच्चित्तवृत्तिः प्रमेयगतसंशयः ॥ प्रमाणगताऽसंभावना प्रमेयगतासंभावना इत्यसंभावनाद्वयं।

भा०—ब्रह्म जगत्का कारणहै क्या प्रधानादिक माया आदिक जगत्के कारण है ऐसी चित्तवृत्ति होनेकूं प्रमेयगत संशय कहतेहै प्रमाणगत असंभावना दूसरी प्रमेयगत असंभावना ऐसे असंभावना दोप्रकारकीहै ॥

ब्रह्मणः सिद्धत्वात्पृथिव्यादिवत्प्रमाणांतरगम्यत्वे श्रुतिः सिद्धब्रह्मप्रतिपादिका कथं भवेत् फलाभावान्नभवत्येवेति निश्चयात्मिका चित्तवृत्तिः प्रमाणगताऽसंभवना, ब्रह्मणो जगद्विलक्षणत्वेन स्थितत्वात् जगत्कारणत्वं कथं संभवति नसंभवत्येवेति निश्चयात्मिका चित्तवृत्तिः प्रमेयगत असंभावना इति ॥

भा०—प्रमाणगत असंभावनाको कहतेहै कि ब्रह्मको स्वतःसिद्ध होनेसे पृथिवी आदिकी तरह अन्य प्रमाण अगम्यत्व करके अर्थात् जो

पृथ्वी आदि पंच भूतमयहै उनकोही प्रमाणांतर करके श्रुति कहतीहै श्रुति स्वतःसिद्ध ब्रह्मकी प्रतिपादक कैसे है फलका अभाव होनेसे नहींहै क्या ऐसी निश्चयात्मिक चित्तवृत्तिको प्रमाण गत असंभावना कहतेहैं १ प्रमेयगत असंभावनाको कहतेहैंकि ब्रह्मको जगत्से विलक्षणता करके स्थित होनेसे अर्थात् ब्रह्मतो जगत्से विलक्षण व्यतिरिक्त धर्मवालाहै वह ब्रह्म जगत्का कारण कैसेहै अथवा नहींहै ऐसी निश्चयात्मिका चित्तवृत्तिको प्रमेयगत असंभावना कहतेहैं इति ॥

प्रमाणगतविपरीतभावना प्रमेयगतविपरीतभावना-
इति विपरीतभावनाद्वयम् । ब्रह्मणः सिद्धत्वेन श्रुती-
नां तत्प्रतिपादकत्वेन निष्फलत्वप्रसंगात् । श्रुतयः
कर्मपरा एवेति निश्चयः प्रमाणगतविपरीतभावना ॥
तंतुपटयोः कार्य्यकारणयोः सारूप्यं दृश्यते अतो
जगद्ब्रह्मणोः सारूप्याभावात् जगत्कारणं प्रधानादि-
कमेवेति निश्चयः प्रमेयगतविपरीतभावना इति ।

भा०-प्रमाणगत विपरीतभावना अरु प्रमेयगतविपरीतभावना ऐसे दो प्रकारकी विपरीतभावना होती है ब्रह्मको सिद्ध होनेसे श्रुतियोंकूं तिस ब्रह्मको प्रतिपादन करनेसे निष्फलत्वप्रसंगसे अर्थात् जो वस्तु स्वतःसिद्ध ही होती है तिसमें प्रमाणादिकदेना निष्फलत्व है ऐसा निष्फलत्व प्रसंग आवैगा इस लिये श्रुति जो है वे कर्मपर है अर्थात् विशेषता करके कर्मकोही वर्णन करती है ब्रह्मका प्रतिपादन नही करती ऐसा निश्चयको प्रमाणगत विपरीत भावना कहते हैं १ ॥ तंतु अरु पटका कार्य्यकारणोंका सारूप्य देखिये है अर्थात् समान सदृशता देखिये है ऐसेही जगत् अरु ब्रह्मके सारूप्यका अभाव दीखनेसे जगत्का कारण प्रधानादिक है ऐसा निश्चयको प्रमेयगत विपरीतभावना कहते हैं क्योंकि जैसे प्रधान आदिक अर्थात् माया अहंकार

आदिक अनित्य हैं तैसाही जगत्भी अनित्य है ऐसी सारूप्यता मिलती है इतिभावः ॥

एवमांतरे तथाहि जगदंतर्यामिणमपिजगद्विलक्षणं ब्रह्मत्वमस्तिनवेति प्रत्यगात्मविषयकःसंशयः ॥१॥

भा०-ऐसा अंतर होनेसे तथाहि सोई कहते हैं कि जगत्के अंतर्यामी कोभी जगत्से विलक्षण ब्रह्मत्व है अथवा नहीं है इसको प्रत्यगात्मविषयक संशय कहते हैं ॥

कर्तृत्वाद्यनेकधर्मविशिष्टस्यममाऽकर्तृब्रह्मस्वरूपत्वं कथं भवेन्न भवत्येवेति निश्चयात्मिका चित्तवृत्तिः प्रत्यगात्मविषयकाऽसंभावना ॥ २ ॥

भा०-कर्तासे आदि अनेक धर्मयुक्त मेरेको अकर्ता अरु ब्रह्मस्वरूपत्व कैसे है अथवा क्या नहीं है ऐसी निश्चयात्मिका चित्तवृत्तिको प्रत्यग् आत्मविषयक असंभावना कहते हैं-इति ।

यद्यऽकर्ताहंतर्हिकथं ममशास्त्रैस्त्वयाकर्तव्यमिति कर्मोपदेशः अतः कर्तेति निश्चयात्मिका चित्तवृत्तिः प्रत्यग्विषयिणीविपरीतभावना ॥ ३ ॥

भा०-जो मैं अकर्ताहूं तो मेरेको तैने कर्मकरनेंही चाहिये ऐसे शास्त्रों करके कैसे कर्मोंका उपदेश है इसवास्ते कर्ताहूं ऐसी निश्चयात्मिका चित्तवृत्तिको प्रत्यग्विषयिणी विपरीतभावना कहते हैं ॥ इति ।

स्थितप्रज्ञाऽस्थितप्रज्ञेति प्रज्ञाद्वयम् १ संप्रज्ञातसमाधिरसंप्रज्ञातसमाधिश्चेतिसमाधिद्वयम् २ एकमेवाद्वितीयं ब्रह्म समष्टिस्थूलसूक्ष्मकारणशरीरोपाधितयाविराट् १ हिरण्यगर्भ २ ईश्वर ३ इतिचोच्यते एतदेवब्रह्मत्रयम् ॥

भा०—स्थितप्रज्ञा अस्थितप्रज्ञा दो प्रकारकी बुद्धि है १ समाधी दो है संप्रज्ञात समाधि है अरु असंप्रज्ञात समाधी है ।

एक अद्वितीय ब्रह्म है वही समष्टीके स्थूल, सूक्ष्म, कारण, शरीरोंकी उपाधी करिके विराट् १ अरु हिरण्यगर्भ २ ईश्वर ३ इति उच्यते ऐसे कहा जाता है येही तीन ब्रह्म है. इति ।

ब्रह्म १ ईश्वरः २ साक्षी परमात्मा कूटस्थः अक्षरं जगदधिष्ठानं जगन्निषेधावधिभूतंच व्यवह्रियते बृहत्त्वाद्बृंहणत्वात् ब्रह्म, बृहत्त्वं व्यापकत्वं बृंहणत्वं शरीरवृद्ध्यादिहेतुत्वमितिविवेकः ॥ समष्टिस्थूलशरीरोपाधिकचैतन्यं विविधं राजमानत्वाद्विराट् ॥ विश्वेषु समस्तेषु नरेष्वहमित्यभिमानित्वाद्वैश्वानरः। विशेषेण भासमानत्वाद्विराज इतिचव्यपदिश्यते ॥

भा०—ब्रह्म कहो अथवा ईश्वर कहो अ० साक्षी, अरु परमात्मा, अ० कूटस्थ अक्षर जगदधिष्ठान जगन्निषेधावधिभूत, ये सब ब्रह्मकेही वाचक शब्द हैं ऐसा व्यवहार है ।

बृहत्त्वात् बडा होनेसे बृंहणत्वात् बढनेसे ब्रह्मका बडापन क्या है कि व्यापक होना बढना क्या है, शरीरवृद्ध्यादिहेतुत्व ऐसा विवेक है समष्टि स्थूलशरीरउपाधी चैतन्यकूं अनेक प्रकार करिके राजमान होनेसे विराट् कहते है, समस्त विश्वविषे अरु नरोंविषे मैं हूं ऐसा अभिमान होनेसे वैश्वानर कहतेहै, विशेषता करिके भासमान होनेसे विराज कहते है ऐसा व्यपदेश है ॥ इति ।

समष्टि सूक्ष्मशरीरोपाधिचैतन्यं ज्ञानशक्तिमत्त्वाद्धिरण्यगर्भः मणिसूत्रवत्समस्तप्रपंचानुस्यूतत्वात्सूत्रात्मा क्रियाशक्तिमत्त्वात्प्राणः इति च व्यपदिश्यते ॥

भा०—समष्टि सूक्ष्मशरीर उपाधि चैतन्यको ज्ञानशक्तिवाला होनेसे हिरण्यगर्भ कहते हैं, मणिके विषे सूतकी तरह समस्त प्रपंच विषे अनुस्यूत, अर्थात् जैसे मणियोंकी मालामें सब जगह सूत्र पुया रहता है तैसे होनेसे सूत्रात्मा कहते हैं, क्रियाशक्तिवाला होनेसे प्राण कहते हैं ऐसा व्यपदेश है ॥

समष्ट्यज्ञानोपाधिकचैतन्यंसमस्तप्राणिनियामकत्वादीश्वरः। समस्तप्राणिहृदयनिष्ठत्वेसति समस्तप्राणिकर्मप्रेरकत्वादंतर्यामीरूपरहितत्वादव्याकृतः ॥

भा०—समष्टिके अज्ञान उपाधि चैतन्यको समस्त प्राणीयोंका नियामक प्रभु होनेसे ईश्वर कहते हैं, समस्त प्राणियोंके हृदयमें स्थित होनेसे समस्त प्राणियोंका कर्मप्रेरक होनेसे अंतर्यामी कहते हैं, अरूप होनेसे अर्थात् रूपरहित होनेसे अव्याकृत कहते हैं ॥

सकलाऽज्ञानतत्कार्यावभासकत्वाज्जगत्कारणंकेनापि प्रमाणेन न व्यज्यत इत्यव्यक्तमितिच व्यपदिश्यते एकएवप्रत्यगात्मा ॥ व्यष्टिस्थूलसूक्ष्मकारण शरीरोपाधिकत्वेन विश्वःतैजस प्राज्ञ इति च व्यपदिश्यते एतदेवजीवत्रयमितिव्यवहारः ॥

भा०—सकल जो अज्ञान अरु तिस अज्ञानका कार्य्यका अवभासक होनेसे जगत्का कारण कहते हैं. किसी प्रकार करिकेभी न्यारा प्रगट नहीं होवे उसको अव्यक्त कहते हैं. प्रत्यगात्मा एकहै सो व्यष्टिके स्थूल सूक्ष्म कारण शरीर की उपाधि करिके विश्व अरु तैजस अरु प्राज्ञ ऐसे कहाता है ॥

प्रत्यगात्मा शरीरत्रयाधिष्ठानं जीवः साक्षी कूटस्थः न क्षरतीत्यक्षरः चिद् चैतन्यं चितिरितिपर्यायाः।

प्रातिलोम्येनांऽचतीति प्रत्यक् तथाहि प्रातिलोम्ये नानृतजडदुःखात्मकाऽहंकारादिभ्यो विलक्षणत्वेन सच्चिदानंदात्मकतयाअंचति प्रकाशते इति प्रत्यक्॥

भा०-प्रत्यक्आत्मा तीनों (स्थूल सूक्ष्म कारण,) शरीरोंका अधिष्ठान (मालिक) जीवहै सो साक्षीभी कहलाता है कूटस्थ है क्षीण नही होता इस लिये अक्षर है चित् कहिये चैतन्य है चिति ऐसाभी कहा जाताहै. जो प्रातिलोम्य अर्थात् जो शरीरधर्मोंसे विलक्षणता करके प्रकाशित हो सो प्रत्यक् है तथाहि सो दिखाते है. कि जो (प्रातिलोम्यकरके) झूठे, जडदुःखात्मक अहंकारआदिकोंसे विलक्षण रहके सच्चिदानंद स्वरूपसे प्रकाश होवे सो प्रत्यक् आत्मा है इति ॥

तथाचाहंकारोनात्मा देहोनात्मा इंद्रियाणिनात्मा इत्येवं निकृष्टाहंकारादिचैतन्यं प्रत्यगित्यर्थः। शरीरद्वयोपादानव्यष्ट्यज्ञानकल्पनाधिष्ठानत्वाच्छरीरत्रयाधिष्ठानम्॥स्वाध्यस्तान् पदार्थान् साक्षाद्वृत्तिव्यवधानं विना अपरोक्षेणेक्षते प्रकाशयतीति साक्षी॥

भा०-तथाच इति-अहंकार आत्मा नहीं है देहभी आत्मा नहीं है इंद्रियभी आत्मा नही है ऐसे जो निकृष्ट अहंकारादिकोंमें चैतन्य प्रकाशता है सो प्रत्यक् है और दो (सूक्ष्म, कारण,) शरीरोंका उपादान अर्थात् जो आदि कारण (व्यष्टि) सब विश्वका अज्ञान है तिसकी कल्पनाका अधिष्ठान होनेसे तीनों शरीरोंका अधिष्ठान (स्थान) है और अपनेमें (अध्यस्त) प्राप्तभये पदार्थोंको साक्षात्, वृत्तिके व्यवधान विना अर्थात् निरंतर वृत्ति करके (अपरोक्षेण) साक्षात् करके देखता है इस लिये साक्षी है. कूट. (घन) की तरह जो निर्विकार करके ठहरे सो कूटस्थ कहिये ऐसा विवेक है. इति ॥

व्यष्टिस्थूलशरीरोपाधिक आत्मा, स्थूलसूक्ष्मकारणशरीराऽसमस्ताभिनिविष्टत्वाद्विश्वः सूक्ष्मशरीरमपरित्यज्य स्थूलशरीरप्रवेष्टृत्वाच्च विश्वः समस्तव्यवहारकृतकत्वाद्व्यावहारिकः चिद्वदभासमानत्वे सति चिल्लक्षणरहितत्वाच्चिदाभास इति व्यपदिश्यते। व्यष्टिसूक्ष्मशरीरोपाधिक आत्मा तेजोमयांतःकरणवृत्तिविशिष्टत्वात्तेजसिवासनायामहंममाऽभिमानितया तृप्तो भवति इति व्युत्पत्तेश्चतैजसः प्रतीतिकालमात्रे विद्यमानत्वात्प्रातिभासिकः अज्ञानकार्य्यनिद्राशक्तिकल्पितत्वात्स्वप्नः कल्पितः इति व्यपदिश्यते ॥

भा०—व्यष्टि, संपूर्ण विश्वके अलग २ स्थूलशरीरकी उपाधिवाला आत्मा जो है वह स्थूल, सूक्ष्म, कारण, इन तीनों शरीरोंका अभिमानी होनेसे विश्व संज्ञक कहलाता है और सूक्ष्मशरीरको विनाही त्यागे हुए स्थूलशरीरमें प्रवेश रखता है इस लिये भी विश्व संज्ञक कहाता है—संपूर्ण व्यवहार करनेवाला होनेसे व्यवहारिक है. चित् चैतन्य, भासमान होनेसे भी, चित् चैतन्य ब्रह्मके, लक्षणोंसे रहित होनेसे चिदाभास भी कहते हैं, व्यष्टिके सूक्ष्म शरीरकी उपाधिवाला आत्मा तेजमय अंतःकरणकी वृत्तिसे विशिष्ट (युक्त) रहनेसे और तेजसि अर्थात् वासनामें (अहं) मैं हूं (मम) मेराहै ऐसे अभिमान करके तृप्त रहता है ऐसी व्युत्पत्ति करके उसे तैजस कहते हैं. प्रतीतिकाल मात्रमें विद्यमान होनेसे प्रातिभासिक कहते हैं और अज्ञानका कार्य निद्राशक्तिकल्पित होनेसे वही स्वप्नकल्पित होता है अर्थात् स्वप्न ऐसा भी कहा जाता है ॥

व्यष्ट्यऽज्ञानोपाधिक आत्मा शरीरद्वयोपादानव्यष्ट्यऽज्ञानतत्कार्य्यावभासकत्वादस्पष्टोपाधि-

तया अनतिप्रकाशकत्वात्प्रज्ञारूपचैतन्यं प्रधान-
पुरुषत्वाच्च प्राज्ञः अवस्थात्रयानुस्यूततया विद्यमान-
त्वात् पारमार्थिकः । अविद्याहंकारदेहाद्युपाधिपरि
च्छिन्नत्वेन भासमानत्वादवच्छिन्न इति व्यपदिश्यते
स्थूलं सूक्ष्मं कारणं इतिशरीरत्रयं॥३॥जाग्रत्स्वप्नसु
षुप्त्यवस्था इत्यवस्थात्रयम् ॥४॥ मनोवाक्कायानि
त्रिविधकारणानि॥५॥पुण्यपापमिश्रकर्माणि कर्मत्र-
यम् ॥६॥ पुण्योत्कर्षपुण्यमध्यमपुण्यसामान्यानीति
पुण्यकर्मत्रयम् ॥ ७ ॥

भा०—व्यष्टिके, संपूर्णजीवोंके अज्ञानकी उपाधिवाला जो आत्मा सो दो शरीरोंका जो उपादानकारण व्यष्टिका अज्ञान है तिसके कार्य-को (अवभासक) प्रकाश करनेवाला होनेसे और स्पष्ट उपाधि करके अत्यंत नहीं प्रकाशक होनेसे (प्रज्ञा,) बुद्धिरूप चैतन्य है सोही प्रधान पु-रुष है, इसलिये प्राज्ञ कहलाता है और तीनों अवस्थाओंमें (सुईमें जैसे तागा पुया रहता है)तैसे अनुस्यूतता करके विद्यमान रहनेसे पारमार्थिक है. अविद्या, अहंकार देह इन उपाधियोंसे(परिच्छिन्नत्व)अल्पज्ञ रहता हुआ भासमान होनेसे अवच्छिन्न ऐसा भी कहा जाता है स्थूल १ सूक्ष्म २ कारण ३ ये तीन शरीर जानो॥३॥ जाग्रत् १ स्वप्न २ सुषुप्ति ३ ये तीन अवस्था है॥४॥मन, वचन, शरीर, ये तीन करण है अर्थात् इन कर-के किया जाता है॥५॥पुण्य, पाप, पुण्यपापसे मिलेहुए कर्म ऐसे तीन प्रकारके कर्म है॥६॥पुण्योत्कर्ष पुण्यमध्यम पुण्यसामान्य, एसे तीन तो पुण्यकर्म है॥७॥

पुण्योत्कर्षरूपकर्मणः हिरण्यगर्भशरीरप्राप्तिः फलं
पुण्यमध्यमरूपकर्मणः इन्द्रादिशरीरप्राप्तिःफलं पुण्य-

सामान्यरूपकर्मणः यक्षरक्षआदि शरीरप्राप्तिः फलं पापोत्कर्षपापमध्यमपापसामान्यानीतिपापकर्मत्रयम्॥८॥पापोत्कर्षस्यपरतापकर गुच्छगुल्मवृश्चिकयूकवनमक्षिकादिशरीरप्राप्तिः फलं पापमध्यमस्य आम्र- पनस- नारिकेल- महिष्यऽश्वगर्दभादि शरीप्राप्तिःफले पापसामान्यस्य गोगजाश्वत्थतुलस्यादिशरीरप्राप्तिःफलं मिश्रोत्कर्ष- मिश्रमध्यम मिश्रसामान्यानीति मिश्रकर्मत्रयम् ॥ ९ ॥

भा०—पुण्योत्कर्ष अर्थात् विशेष पुण्यवाले कर्मका फल यह है कि हिरण्यगर्भ ब्रह्माके शरीरकी प्राप्ति होवे, मध्यम पुण्यवाले कर्मका फल इंद्रआदि शरीरप्राप्ति होना, सामान्य पुण्यवाले कर्मका फल यक्ष राक्षस आदि शरीर प्राप्ति होना है—पाप उत्कर्ष, पाप मध्यम, पाप सामान्य, ऐसे तीन पापकर्म हैं ॥ ८ ॥ पापउत्कर्ष, विशेषपापवाले कर्मका फल अन्यको दुःखदायी, (कंटकादिसे युक्त) गुच्छा, (गुल्म) थोहरसरीखा, बीछू जूंम धनकी मांखी इत्यादिकोंकी शरीरकी प्राप्ति है पाप मध्यम कर्मका फल आंम फालसा नारियल वृक्ष भैंस घोडा गधा आदि शरीर प्राप्त होना है, सामान्य पापवाले कर्मका फल गौ हस्ती पीपलवृक्ष, तुलसी इत्यादिक शरीरकी प्राप्ति है—मिश्र उत्कर्ष, मिश्र मध्यम, मिश्र सामान्य, ऐसे तीन प्रकारके मिश्रकर्म हैं ॥ ९ ॥

मिश्रोत्कर्षस्यनिष्काम- कर्मानुष्ठानादि-निर्विकल्पकसमाधिपर्यंतयोग्यशरीरप्राप्तिःफलं मिश्रमध्यमस्य स्वाऽऽश्रमोचितकाम्यकर्मयोग्यशरीरप्राप्तिः फलम् । मिश्रसामान्यस्य चांडालव्याधादिशरीर प्राप्तिःफलं मनोवाक्कायभेदेन कामादिप्रेरितमनो-

वाक्कायकृतकर्मोत्कर्षादिभेदेन कर्मतत्फलं चानेकविधमितिज्ञातव्यम् ॥ इच्छाप्रारब्धं परेच्छाप्रारब्धम् अनिच्छाप्रारब्धमिति प्रारब्धत्रयम् ॥१०॥ तद्यथा स्वेच्छाकृतं भिक्षाटनादि । समाध्यवस्थायां शिष्यादिदीयमानमन्नादिकं परेच्छाकृतं । समाध्यवस्थायांव्युत्थानदशायां वा आकाशफलपातवदकस्माज्जायमानं पाषाणपतनकंटकवेधादिकमनिच्छाकृतम् ॥

भा०—मिश्रोत्कर्ष विशेषामिले हुए उत्तम कर्मका फल निष्कामकर्म के अनुष्ठानमें निर्विकल्प समाधिपर्यंत जो योग्य होवे ऐसा शरीरकी प्राप्ति होना और मिश्र मध्यम कर्मका फल अपनें आश्रमके योग्य काम्य कर्म करनें लायक शरीरकी प्राप्ति होना मिश्र सामान्य कर्मका फल चांडाल व्याध आदि शरीर प्राप्तहोना और मन वचन शरीर इनके भेदकरके काम आदिकी प्रेरणासे मन वचन शरीरसे किये कर्मोंका उत्कर्ष आदि भेदकर जो कर्म किया जाताहै उसका फल अनेक प्रकारका होताहै ऐसे जानना।इच्छा प्रारब्ध १ परेच्छा प्रारब्ध २ अनिच्छा प्रारब्ध ३ ऐसे तीन प्रकारके प्रारब्ध हैं॥१०॥सो ऐसे कि भिक्षा मांगना आदि अपनी इच्छाकृत प्रारब्ध १ समाधि अवस्थामें शिष्य आदि जो कछु अन्न आदि देते हैं वह परेच्छाकृत प्रारब्ध हैं २ और समाधि अवस्थामें अथवा जाग्रत्में आकाशसे फल गिरनेकी तरह जो ऊपरसे पत्थर आदि गिरपडे अथवा कांटा आदि लगजावे यह अनिच्छाकृत प्रारब्धभोगहै ॥ ३ ॥

भूतप्रतिबन्धो, वर्त्तमानप्रतिबन्ध, आगामिप्रतिबन्धश्चेति ज्ञानप्रतिबन्धकप्रतिबन्धत्रयम् ॥ ११ ॥ श्रवणमननादिकाले सर्वजडवस्तुसाक्षात्कारो भूत-

प्रतिबन्धः। पापकर्मजनितकार्योन्नेयः वर्त्तमानप्रतिबन्धः। एकस्मिन्पुरुषे दयाविश्वासादिरूढशक्तिजनको यः प्रारब्धशेषः स आगामिप्रतिबन्धः। स तु जडभरतादिषु प्रसिद्धः। संयोगसमवाय आध्यासिकस्तादात्म्यसंबन्ध इति संबन्धत्रयम् ॥१२॥ अथवा कार्यकारणभावः विषयविषयिभावः, आधाराधेयभावश्चेति संबन्धत्रयम्, अथवा पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः, प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति संबन्धत्रयम् ॥ १३ ॥ लक्षणंतत्त्वमस्यादिवाक्यमित्यर्थः ॥

भा०—भूतप्रतिबंध १ वर्त्तमानप्रतिबंध २ आगामिप्रतिबंध ३ ऐसे ज्ञानके प्रतिबंधक ये तीन प्रतिबंध है ॥११॥ श्रवण मनन आदि कालमें संपूर्ण जड़ वस्तुओंका साक्षात्कार अनुभव रहना यह भूतप्रतिबंध है—पापकर्मसे उत्पन्न हुआ कार्य बढ़जावे यह वर्त्तमानप्रतिबंध है—किसी एक पुरुषमें दया विश्वास आदिसे आरूढशक्तिको—उत्पन्न करनेवाला जो अवशेष रहा प्रारब्ध है वह आगामि प्रतिबंध है सो तो जडभरत आदिकोंमें प्रसिद्ध ही है—संयोगसमवाय १ आध्यासिक २ तादात्म्य संबंध ३, ऐसे तीन संबंध हैं ॥१२॥ अथवा कार्यकारणभाव १ विषयविषयिभाव २ आधाराधेयभाव ३ ये भी तीन संबंध कहे हैं; अथवा पदों २ में सामानाधिकरण्य १ पदार्थोंमें विशेषणविशेष्यभाव २ प्रत्यगात्मा और प्रत्यगात्माके लक्षणमें लक्ष्यलक्षणभाव संबंध ३ ऐसे तीन संबंध जानो। तत् त्वमसि इत्यादिक वाक्योंका लक्षण कहते हैं—इति ॥

इदं तत्त्वमसीतिवाक्यं संबन्धत्रयेणाऽखंडार्थबोधकं भवति। संबन्धत्रयं नाम पदयोः सामानाधि-

करण्यं पदार्थयोः विशेषणविशेष्यभावः प्रत्यगात्म-लक्षणयोर्लक्ष्यलक्षणभावश्चेति । तदुक्तं च ।श्लोकः। सामानाधिकरण्यञ्च विशेषणविशेष्यता॥लक्ष्यलक्षणसंबन्धः पदार्थप्रत्यागात्मनाम्॥१॥इति॥सामानाधिकरण्यसंबन्धस्तावद्यथा । सोयं देवदत्त इति वाक्ये तत्कालविशिष्टदेवदत्तवाचकशब्दस्य एतत्कालविशिष्टदेवदत्तशब्दस्य चैकस्मिन्पिंडे तात्पर्य्यसंबन्धः ॥ तथाच तत्त्वमसीतिवाक्ये परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्याऽपरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिंश्चैतन्ये तात्पर्यसंबन्धः ॥ विशेषणविशेष्यभावसंबन्धस्तु ।

भा०-सो यह तत् त्वमसि ऐसा वाक्य तीनों संबंधो करके (अखंड) पूर्ण अर्थका बोधक है संबंध तीन वेही प्रसिद्ध है पदोंमें सामानाधिकरण्य१ पदार्थोंमें विशेषणविशेष्यभाव२ प्रत्यगात्मा और लक्षणमें लक्ष्यलक्षणभाव३

१ भिन्न भिन्न शब्दयोरेकस्मिन्नर्थे प्रवृत्तिः सामानाधिकरण्यम् ॥ २ व्यावर्त्तक विशेषणं व्यावर्त्यं विशेष्य तथाच सोय देवदत्त इतिवाक्ये एव सशब्दवाच्यो योसावेतत्कालेतद्देशसबधविशिष्टो देवदत्तपिंडः अय सइति तच्छब्दवाच्यैतत्कालेतद्देशसबधविशिष्टदेवदत्तपिंडाद्भिन्नानेति यदा प्रतीयते तदातच्छाब्दार्थस्यायशब्दवाच्यार्थनिष्ठभेदव्यावर्त्तकतया विशेषणत्वमयशब्दार्थस्य व्यावर्तकत्वाद्विशेष्यत्वम् । यदाच सइति तच्छब्दवाच्यतत्कालतद्देशविशिष्टो देवदत्तपिंडः सोयमितीदशब्दवाच्यादेतत्कालेतद्देशसबधविशिष्टादस्माद्देवदत्तपिंडान्न भिन्न इति यदा प्रतीयते तदा अयशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेदव्यावर्तकतया विशेषणत्व तच्छब्दार्थस्य व्यवर्त्यत्वाद्विशेष्यत्व तथा अय स एवायमित्यन्योन्यभेदव्यावर्त्तकतया सोयशब्दार्थयोः परस्परं विशेषणः विशेष्य इत्यर्थः ।

सो कहाभीहै श्लोकार्थः— सामानाधिकरण्य १ विशेषणविशेष्यभाव२लक्ष्य-लक्षण ३ ऐसे ये३ संबंध पदार्थोंके और प्रत्यागात्माके रहतेहैं ॥१॥ सो सामानाधिकरण्य संबन्ध पहले कहतेहैं जैसे-(सोयं देवदत्तः) यह वही देवदत्तहै इस वाक्यमें तिस पहले कालमें देखाहुआदेवदत्तके वाचक शब्दका और अब वर्त्तमानकालमें प्राप्तहुआ देवदत्त शब्दका एकही पिंडशरीर उसीशरीरमें तात्पर्यसंबंध है तैसे ही तत्त्वमसि इस वाक्यमें परोक्षत्व आदि विशिष्ट जो चैतन्य (ब्रह्म) का वाचक तत् पद है उसका और जो अपरोक्षत्व (प्रत्यक्ष) आदि विशिष्ट (त्वंके) चैतन्यका वाचक जो पद है उसका एकही चैतन्यमें तात्पर्य संबंधहै। इति। और विशेषणविशेष्यभाव संबंध तो आगे कहतेहैं।

यथातत्रैववाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्याऽयंशब्दार्थे तत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः तथा तत्त्वमसीतिवाक्येपि तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थाऽपरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतयाविशेषणविशेष्यभावः ॥ लक्ष्यलक्षणसंबंधस्तु यथा तत्रैववाक्ये सशब्दायं शब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाऽविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः ॥

भा०—जैसे तहां ही वाक्यमें सशब्दका अर्थ तत्कालविशिष्ट जो देवदत्त है उसका और (सोयं) अयं शब्दका अर्थ जो एतत्कालविशिष्ट देवदत्त है उसका आपसमें भेदकी निवृत्ति होनेसे विशेषणविशेष्यभाव। तैसे ही तत् त्वमसि इस वाक्यमें तत्पदका अर्थ परोक्षत्वआदिविशिष्ट

चैतन्यका और त्वंपदका अर्थ अपरोक्ष (प्रत्यक्ष) त्वं आदि विशिष्ट चैतन्यका भेदकी (व्यावर्त्तकता,) निवृत्ति होनेसे विशेषण विशेष्यभाव संबंध है। लक्ष्यलक्षणसंबंध तो जैसे तिसी (सोयं देवदत्तः) वाक्यमें सशब्द और अयंशब्द अथवा तिनके अर्थका विरुद्ध तत्काल और एतत्कालविशिष्टत्व धर्मके परित्याग करके अविरुद्ध देवदत्तकी साथ अर्थात् सोयं देवदत्तः इस वाक्यमें (स अयम्) इन शब्दशब्दार्थोंकाभेदहै देवदत्तका अभेदहै इस लिये यहां लक्ष्यलक्षणभाव संबंध है।

तथाऽत्रापि तत्त्वंपदयोः तदर्थयोर्वाविरुद्धपरोक्षत्वादिविशिष्टत्वपरित्यागेनाऽविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः। इयमेव जहदऽजहल्लक्षणा। अपरपर्य्याय एकांशपरित्यागेन एकांशस्य ग्रहणं भावलक्षणेत्युच्यते॥ आध्यात्मिकं आधिभौतिकमाधिदैविकं चेति तापत्रयम्॥१४॥आध्यात्म्यमाधिभूतमाधिदैवतमित्यध्यात्म्यादित्रयम्॥१५॥ आरंभपरिणामविवर्ताः कारणत्रयम् ॥ १६ ॥

भा०—तैसे यहां भी तत्त्वं इन पदोंका अथवा इनके अर्थोंका जो विरुद्ध परोक्षत्व आदि विशिष्टत्व धर्म है उसके परित्याग करके अविरुद्ध चैतन्यके साथ अर्थात् जैसे तत् त्वं इन पद पदार्थोंका भेद है चैतन्य वही है इसलिये यहां लक्ष्यलक्षणभाव संबंध है—यही जहत् अजहत् लक्षणा होती है। यह दूसरा पर्याय है कि एक अंशका परित्याग करके एक अंशका जहां ग्रहण हो सो भावलक्षणाभी कहलाती है—आध्यात्मिक१ आधिभौतिक २ आधिदैविक ३ येतीन ताप हैं १४—आध्यात्म्य१ आधिभूत २ आधिदैवत ३ ये अध्यात्म आदि तीन कहे हैं १५—और—आरंभ १ परिणाम २ विवर्त्त ३ ऐसे तीन कारण हैं ॥१६॥

यथा दुग्धमेवदध्याकारं विपरिणमते तथा प्रकृतिप्रधानशब्दवाच्यामायैव जगदाकारं परिणामंगता इति प्रक्रिया सांख्यानांमते परिणामवादः ॥ यथा बहुमृत्कणिकासंमिलितोघटो यथा बहुतंतुसंमिलितः पटस्तथाबह्वणुसंमिलितं सत्जगदुत्पद्यते इति नैयायिकानांमते ॥ आरंभवादः चिद्विवर्त्तश्चिदेव इति वेदांतिकानांमते विवर्तवादः । सत्वरजस्तमांसीति गुणत्रयम् ॥ १७ ॥

भा०-जैसे दूधही दहीके आकार विकारको प्राप्त हो जाता है तैसेही प्रकृति प्रधान, इन शब्दोंसे वाच्य मायाहि जगत्के आकार हो विकारको प्राप्त हो रही है ऐसी यह प्रक्रिया सांख्यवालोंके मतमें है यही परिणाम वाद कहलाता है।जैसे बहुतसी मृत्तिकाकी किणकोंसे मिलके घट होता है और जैसे बहुत (तंतु) तागोंसे (पट) वस्त्र होता है तैसे बहुतसे अणुवोंसे मिलके जगत् उत्पन्न होता है ऐसे नैयायिकोंके मतमें आरंभवाद है। (चित्) चैतन्य ब्रह्मका विवर्त्त (आभास) (चिद) (चित्) ब्रह्म स्वरूपही है ऐसे वेदांतियोंके मतमें विवर्त्तवाद है-सत्वगुण रजोगुण, तमोगुण ये तीन गुण है १७॥

भूतभविष्यद्वर्तमानकालाः कालत्रयम् ॥ १८ ॥ ब्रह्मविष्णुमहेश्वराः मूर्तित्रयम् ॥ १९ ॥ ज्ञाताज्ञानं ज्ञेयं ज्ञात्रादित्रयम् ॥ २० ॥ एतदेवत्रिपुटीत्युच्यते। त्रयाणां पुटानां प्रकाराणां ज्ञात्रादीनां समाहारः त्रिपुटीत्यर्थः । स्थूलप्रपंचः सूक्ष्मप्रपंचः कारणप्रपंचश्चेति प्रपंचत्रयम् ॥ २१ ॥ पातालमर्त्यस्वर्गाः

लोकत्रयम् । एतदेव जगत्त्रयमितिचोच्यते ॥२२॥ संशयाऽसंभावनाविपरीतभावनां ज्ञानप्रतिबंधकत्रयम् ॥ २३ ॥ लोकवासना देहवासना शास्त्रवासना चेति वासनात्रयम् ॥ २४ ॥ श्रवणमनननिदिध्यासनानि श्रवणादित्रयम् ॥ २५ ॥

भा०—भूत, भविष्यत्, वर्त्तमान, येतीन काल है। १८। ब्रह्मा, विष्णु, (महेश्वर, शिव ये तीन मूर्त्ति है॥१९॥(ज्ञाता,)जाननें वाला, ज्ञान, २ (ज्ञेय)। जाननें योग्यपदार्थ ये तीन ज्ञात्रादिक है ॥२०॥ यही त्रिपुटी कहाती है तीन पुटोंका (ज्ञाता आदि प्रकारोंका जहां संचय हो सो त्रिपुटी कहिये स्थूल प्रपंच, सूक्ष्म प्रपंच, कारण प्रपंच, ऐसे तीन प्रकारका प्रपंच होता है ॥ २१ ॥ पाताल, मृत्यु, स्वर्ग ये तीन लोक है यही जगत्त्रय कहलाता है॥२२॥संशय, १ असंभावना २ विपरीतभावना ३ येतीन ज्ञानके प्रतिबंध कहे ॥२३॥ लोकोंकी वासना १ देहकी वासना, २ शास्त्रकी वासना ३ ये तीन वासना है- ॥ २४ ॥ श्रवण १ मनन २ निदिध्यासन ३ ये तीन श्रवणादिक है ॥ २५ ॥

सर्वसंशयनिवर्तकंश्रवणम् । मननं मनसंभावनानिवर्तकम् ॥ निदिध्यासनं तु विपरीतभावनानिवर्तकमिति विवेकः ॥ ज्ञानं वैराग्यमुपरतिश्चेति ज्ञानादित्रयम् ॥ २६ ॥ हेतुस्वरूपकार्य्याणि हेत्वादित्रयम् ॥ २७ ॥ ज्ञानस्य हेतुः श्रवणादित्रयम् । अहं देहेंद्रियाद्यतिरिक्तः साक्षी प्रतीयमानप्रपंचोप्यसत्य इति दृढनिश्चयोज्ञानस्य स्वरूपम् । अत्रनिश्चयस्य दार्ढ्यं नाम संशयादिराहित्यम् ॥

भा०-संपूर्ण संदेहोंकी निवृत्ति करै ऐसा श्रवण कहा है. मनकी भावना (संशय) को निवृत्त करनेंवाला मनन है, और निदिध्यासन मतों विपरीतभावनाको दूर करनेंका है ऐसा विवेक है ॥ ज्ञान, वैराग्य, उपरति, ये तीन ज्ञान आदिक है॥२६॥-हेतु १ स्वरूप २ कार्य ३ ये तीन हेत्वादिक कहाते है॥२७॥(जैसे) ज्ञानके हेतु श्रवणादिक तीन श्रवण १ मनन २ निदिध्यासन ३ , है(अहं) में देह, इंद्रिय, आदिकोंसे न्यारा साक्षीहूं (प्रतीयमान) यह दीखता हुआ सब प्रपंचभी असत्य है ऐसा दृढ निश्चय ज्ञानका स्वरूप है। यहां निश्चयकोभी जो दृढपना कहा है सो संशय आदि रहित निश्चयका नाम जानना।

अनात्मस्वात्मत्वबुद्ध्यऽभावोज्ञानकार्य्यमिति विवेकःवैराग्यस्य हेतुर्विषयेषु दोषदृष्टिःवांताशनवद्धेयताबुद्धिः स्वरूपं पुनराशाऽभावः कार्य्यमिति भावनीयम्। उपरतेहेतुः यमनियमादि ॥ चित्तनिरोधः स्वरूपं सर्वव्यवहारनाशः कार्य्यमिति हेतु स्वरूपकार्य्याणि ज्ञानवैराग्योपरतीनां विज्ञेयानि ॥.

वैराग्यस्याऽवधिर्ब्रह्मलोकतृणीकारः। अज्ञानकालेदेहादावात्मत्वविषयिणी दृढा बुद्धिर्यथातथा तदप्रतीतिपूर्वकमहं ब्रह्मेति दृढनिश्चयः बोधस्यावधिः ॥

भा०-देह आदिक, अनात्म वस्तुओंमें अपने आत्मापनकी बुद्धिका अभावको ज्ञानका कार्य कहते है ऐसा विवेक है-वैराग्यका हेतु यह है, विषयोंम दोषकी दृष्टि करना और वमन किये हुए भोजनकी तरह विषयोंके त्यागकी बुद्धि वैराग्यका स्वरूप है, फिरभी आशा नहीं करनी यह कार्य है ऐसे विचारना-उपरतिका हेतु यम नियम आदि हैं और स्वरूप (चित्तनिरोध) चित्त वशमें करना है-संपूर्ण व्यवहार चेष्टाका

नाश करना (उपरतिका) कार्य है–इस प्रकारसे ज्ञान, वैराग्य, उपरा इनके हेतु, स्वरूप, कार्य, जानने ॥ वैराग्यकी अवधि ब्रह्मलोकपर्य तृणवत् समझना और अज्ञानकालमें जो देह आदिकोंमें (आत्मत्व आत्मापनके विषयवाली दृढ बुद्धि होजावे तब जैसे तैसे उसको दू करके(अहं ब्रह्म) मैं ब्रह्मस्वरूपहूं ऐसा दृढ निश्चय करना यह बोधकी अवधि है–

सुषुप्तिवत्समस्तवस्तुविस्मृतिरुपरतेरवधिरितिविज्ञेयम् । प्राणनिग्रहोपाया रेचकपूरककुंभकाःप्राणायामत्रयम् ॥२८॥ नेत्रधर्म्माऽऽध्यमांद्यपटुत्वान्यांध्यादित्रयम् ॥ २९ ॥ सहजतादात्म्यं कर्मजन्यतादात्म्यं भ्रांतिजन्यतादात्म्यमिति अहंकारस्य चिच्छायादेहसाक्षिभिस्तादात्म्यत्रयम् ॥ ३० ॥ तत्र चिच्छायया सह यदहंकारस्य तादात्म्यं तत्सहजम्। यच्च देहेन सह अहंकारस्य तादात्म्यं तत्कर्मजम् ॥ यत्साक्षिणा सह तद्भ्रांतिजम् ॥

भा०–सुषुप्ति अवस्थाकी तरह संपूर्ण वस्तुओंकी विस्मृति होना उपरतिकी अवधि है ऐसे जानना–प्राणोंका निग्रहके उपाय रेचक, पूरक, कुंभक, ये तीन प्राणायामहै॥२८॥नेत्रके धर्म (आंध्य) अंधापन (मांद्य) स्वल्पदीखना (पटुत्व,) अच्छी तरह दीखना, ऐसे ये तीन है ॥२९॥ सहजतादात्म्य, कर्मजन्य तादात्म्य, भ्रांतिजन्यतादात्म्य ऐसे अहंकारके (चिच्छाया) चिदाभास देह, साक्षी, इनके साथ तीन तादात्म्य, संबंध रहते है ॥३०॥ तहां चिच्छायाके साथ जो अहंकारका तादात्म्य संबंध है सो सहज कहाहै, और देहके साथ जो अहंकारका तादात्म्य संबंध है सो कर्मज अर्थात् कर्मोंसे हुआ है, और साक्षी अर्थात् जीव

संज्ञक आत्माके साथ जो अहंकारका संबंध है सो भ्रांतिज अर्थात् भ्रांति करके हो-रहा है ॥

अथास्य निवृत्तिः ॥ संबंधिनोः चिच्छायाहंकारयोः सतोः विद्यमानयोः सहजस्य निवृत्तिर्न भवति संबंधिनाशे निवृत्तिरस्तीत्यर्थः ॥ यथा शरावोदकनिमित्तोदयस्य सवितृप्रतिबिंबस्य शरावोदकनिवृत्त्या निवृत्तिवदित्यर्थः। यत्तु शरीराहंकारयोस्तादात्म्यं तत्कर्मक्षयान्निवर्तते यश्च आत्माहंकारयोस्तादात्म्यं तत्प्रबोधान्निवर्तते।ब्रह्मात्मतत्त्वसाक्षात्कारात्त्रिविधमपितादात्म्यं युगपदेवनिवर्तते ॥

भा०—अब इस (साक्षी) जीवकी निवृत्तिको कहते हैं—कि संबंधवाले चिच्छाया) चिदाभास और अहंकार इन दोनुओंके साक्षात् विद्यमान हुए उन्ते सहज जो संबंध है उसकी निवृत्ति नहीं होगी और जब संबंधवालोंकी निवृत्ति होंजागी तब निवृत्ति होजावेगी; जैसे कि—सराईमें घाले हुए जलके निमित्त करके उदय हुए सूर्यके प्रतिबिंबका नाशसराईके जलकी निवृत्ति होनेसे होता है तैसे ही (यह सहज संबंध अहंकारके नाश होने से होगा) और जो शरीरके संग अहंकारका तादात्म्य संबंध है वहतो कर्म नष्टहोते ही निवृत्त होता है और ब्रह्म आत्मतत्वके साक्षात्कार होनेसे तो यह तीनों प्रकारकाही तादात्म्य संबंध एकहीवार (निवृत्त) दूर हो जाता है।

अज्ञानादेवाहमित्यात्मपरिच्छेदो भवति प्रबोधेनाऽज्ञाननिवृत्तावपरिच्छिन्न एवात्माहमिति चोच्यते । पुत्रैषणा वित्तैषणा लोकैषणा चेत्येषणात्रयम्॥३१॥ सुषुप्तिमूर्च्छासमाधयः सुषुप्त्यादित्रयम्॥३२॥विपर्यासक्तिः १ प्रज्ञामांद्यं २ कुतर्कः ३ विपर्य्ययदुरा-

ग्रह ४ श्चेतिज्ञानेवर्तमानप्रतिबंधकचतुष्टयम् ॥ १ ॥ विषयेरूढासक्तिर्विषयासक्तिः । बोधितस्यार्थस्य बुद्ध्याऽग्रहणं प्रज्ञामांद्यम् ॥

भा०—अज्ञानसेही (अहं) मैंहूं ऐसा आत्मासे (पीच्छेद) अलग होता है, जब (प्रबोध) ज्ञान होता है तब अज्ञानकी निवृत्तिमें (अपरिच्छिन्न) परिच्छेदरहित ही मैं (आत्मा) ब्रह्महूं ऐसा कहा जाता है ॥ पुत्रैषणा १ वित्तधनकी एषणा(इच्छा)लोककीएषणा ऐसे ये तीन एषणा अर्थात् इच्छा है॥३१॥सुषुप्ति मूर्च्छा समाधि ये सुषुप्ति आदि तीन अवस्थाहै॥३२॥विषयासक्ति १ प्रज्ञामांद्य २ कुतर्क ३ विपर्ययदुराग्रह ४ ये चार ज्ञानविषें वर्त्तमान प्रतिबंधक रहते है—१ विषयमें रूढ लगी हुई आसक्ति रहना यह विषयासक्ति है, और (बोधित) बोध करा ये हुए अर्थका भी बुद्धि करके ग्रहण नहीं करना यह प्रज्ञामांद्य कहलाता है ॥

प्रतिपादितस्यार्थस्य विपरीतग्रहणं कुतर्कः । अहं श्रोत्रियः पंडितोऽहं विरक्तोऽहमिति देहेंद्रियादावात्मत्वबुद्धिर्विपर्ययदुराग्रहः । शमादिषट्केन विषयासक्तेर्निवृत्तिः श्रवणेन प्रज्ञामांद्यस्य मनने । कुतर्कस्य निदिध्यासनेन विपर्ययदुराग्रहस्येति विवेकः । धर्मार्थकाम मोक्षाः पुरुषार्थचतुष्टयम् ॥२॥ जातिगुणक्रियासंबन्धाः शब्दप्रवृत्तिनिमित्तचतुष्टयम् । ३ शब्दप्रवृत्तिनिमित्तानां तेषां ब्रह्मण्यऽसत्त्वेन तस्मिन् शब्दाऽप्रवृत्तिरिति विभावनीयम् ॥

भा०कहे हुए अर्थको (विपरीत) उलटे प्रकारसे ग्रहण करे वह कुतर्क

१ यथा गौः शुक्ला धावति इत्यत्र जाति गुण क्रिया संबंधाः तथैव सर्वत्रद्रष्टव्यम् ।

कहाताहै–मैं विद्वान् हूं (पंडित) ज्ञानवान् हूं विरक्त हूं ऐसा देह इंद्रिय आदिकों विषे आत्मत्व बुद्धि करना यह विपर्यय दुराग्रह कहाताहै. शम आदिक छहो करके विषयासक्तिकी निवृत्ति होतीहै, श्रवण करके प्रज्ञामांद्यकी निवृत्ति, मनन करके कुतर्ककी, निदिध्यासन करके विपर्यय दुराग्रहकी निवृत्ति होतीहै ऐसा विवेकहै ३। धर्म, अर्थ, काम, मोक्ष, यह पुरुषार्थचतुष्टय, चार पुरुषार्थ है २। जाति, गुण, क्रिया, संबंध, ये चार शब्दकी प्रवृत्तिमे निमित्तहै ३।इनशब्दप्रवृत्तिनिमित्तोका ब्रह्ममे अभाव है इस लिये तिस ब्रह्मविषे शब्दाप्रवृत्ति अर्थात् शब्दकी प्रवृत्तिही नहीं है ऐसी (भावना) विचारना चाहिये।

ब्रह्मक्षत्रियवैश्यशूद्रा इति वर्णचतुष्टयम् ४। ब्रह्मचर्य्याश्रमः गृहस्थाश्रमः वानप्रस्थाश्रमः यत्याश्रमश्चेत्याश्रमचतुष्टयम् ५। नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमादिषट्संपत्तिः मुमुक्षुत्वं चेति साधनचतुष्टयम् ६। विषयप्रयोजनसंबन्धाऽधिकारिणः अनुबन्धचतुष्टयम्। तद्यथा साधनचतुष्टयसंपन्नप्रमाताधिकारी, विषयो जीवब्रह्मैक्यं, शुद्धं चैतन्यं प्रमेयम् तत्रैव वेदांतानां तात्पर्य्यात्। संबन्धस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावलक्षणः इति॥७॥

भा०–ब्राह्मण, क्षत्रिय, वैश्य, शूद्र ये चार वर्णहै ४।ब्रह्मचर्य आश्रम १ गृहस्थाश्रम २ वानप्रस्थाश्रम ३ यति आश्रम ये चार आश्रमहै ५। नित्य अनित्य वस्तुका विवेक, इसलोक और परलोकके फलभोगोंका त्याग, शम आदिक छहसंपत्ति, मुमुक्षुत्वधर्म, ये चार साधन (साधन चतुष्टय) है ६।विषय, प्रयोजन, संबंध, अधिकारी यह (अनुबंधचतुष्टय)

चार अनुबंधहै ६। सो ऐसेहै कि इन चार साधनोंसें युक्तहुआ (प्रमाता) मुमुक्षुजन अधिकारी है जीवब्रह्मकी ऐक्यता यह विषयहै, शुद्ध चैतन्य परमात्मा प्रमेयहै; तहांही वेदान्तशास्त्रोंका तात्पर्य्य होनेसे संबंधतो तिस जीवकी अरु प्रमेयकी ऐक्यताका और तिस ऐक्यताको प्रतिपादन करनेवाले वेदप्रमाणका बोध्यबोधकभावलक्षण है ॥ ७ ॥ इति ॥

प्रयोजनं तु तदैक्यप्रमेयगताऽज्ञाननिवृत्तिः स्वरूपानंदावाप्तिश्च मनोबुद्ध्यऽहंकारचित्तान्यन्तःकरणचतुष्टयम् ८ । संकल्पाध्यवसायाऽभिमानाऽनुसंधानानि संकल्पादिचतुष्टयम् ९ । संकल्पवृत्तिरूपेण परिणतमंतःकरणं । मनः । मननात्मकं वा मनः । संकल्पवृत्तिहेतुर्वा मनः संकल्पः १ निश्चयाख्यवृत्तिरूपेण परिणतमंतःकरणं बुद्धिः।निश्चयात्मिका वा बुद्धिः । निश्चयहेतुर्वा बुद्धिः अध्यवसायः २ अभिमानवृत्तिरूपेण परिणतांतःकरणमहंकारः अभिमानात्मको वाऽभिमानकरो वा ३ पूर्वोत्तरानुसंधानरूपवृत्तिमदंतःकरणचित्तमअनुसंधानात्मकं वा अनुसंधानकरं वाऽनुसंधानम् ४ ॥

भा०—प्रयोजन तहां तिस जीवब्रह्मकी ऐक्यता, (प्रमेय) शुद्ध चैतन्यमें प्राप्त हुए अज्ञानकी निवृत्ति और अपनें स्वरूपके आनंदकी प्राप्ति है मन बुद्धि, अहंकार, चित्त, यह अंतःकरणचतुष्टय, अर्थात् चार प्रकारका अंतःकरण है ८।संकल्प १ अध्यवसाय२ अभिमान ३ अनुसंधान ४ ये चार संकल्प आदिक है ९ —संकल्पवृत्तिरूप करके विकारको प्राप्त हुआ अंत करण मन होना, अथवा मननरूप मन अथवा संकल्प वृत्तिका हेतुरूप मन संकल्प कहलाता है १ निश्चय नामक वृत्तिरूप

करके विकारको प्राप्त हुई अंतःकरणबुद्धि अथवा निश्चयात्मिका बुद्धि अथवा निश्चयका हेतुरूप बुद्धि अध्यवसाय कहलाता है २ अभिमान वृत्तिरूप करके विकारको प्राप्त हुआ अंतःकरण, अहंकार अथवा अभिमान स्वरूप अहंकार अथवा अभिमानको करनें वाला अहंकार अभिमान है ३ पूर्व उत्तरका अनुसंधान रूप वृत्तिवाला अंतःकरण चित्त अथवा अनुसंधानात्मक अर्थात् ऐसे काना एवं विचारात्मक अथवा अनुसंधानको करनेवाला चित्त अनुसंधान है ॥ ४ ॥

ऋग्यजुःसामाथर्वाणः वेदाः वेदचतुष्टयम् ॥ १० ॥ प्रत्यक्षानुमानोपमानशब्दाः प्रमाणचतुष्टयम्॥११॥ लयविक्षेपकषायरसास्वादाः समाधिविघ्नचतुष्टयम् ॥ १२ ॥ लयस्तावदखंडवस्त्वऽनवलंबनेन चित्तवृत्तेर्निद्रा, अखंडवस्त्वनवलंबनेन चित्तवृत्तेरन्यावलंबनं विक्षेपः । लयविक्षेपाभावेपि चित्तवृत्तेरागादिवासनया स्तंभीभावादखंडवस्त्वनवलंबनं कषायः। अखंडवस्त्वऽनवलंबनेपि चित्तवृत्तेः सविकल्पानंदाऽऽस्वादनं रसास्वादः समाध्यारंभसमये सविकल्पानंदास्वादनं वा॥ मैत्री, करुणा, मुदितोपेक्षा मैत्र्यादिचतुष्टयम् ॥ १३ ॥

भा०-ऋक् १ यजु २ साम ३ अथर्ववेद ४ ये चार वेद हैं ॥ १० ॥ प्रत्यक्ष, अनुमान, उपमान, शब्द, ये चार प्रमाणहैं ॥११॥ लय, विक्षेप, कषाय, रसास्वाद, ये चार समाधिके विघ्नहैं ॥ १२ ॥ तहां (अखंड) परिपूर्ण वस्तुका (अनवलंबन) आश्रय नहींकरनेसे चित्तकी वृत्तिको (निद्रा) आलस्यहीन लय कहा है १ अखंडवस्तु (ब्रह्म) का अवलंबन नहीं करनेसे चित्तकी वृत्ति अन्यवस्तुका अवलंबन करलेवे यह विक्षेप

है २ लय, विक्षेप इन दोनुवोंके अभावमें भी राग (स्नेह) आदि वासना करके चित्तकी वृत्तिका (स्तंभीभाव) बन्दहोनेसे रुकनेसे अखंड वस्तु (ब्रह्म) का अवलंबन (प्राप्ति) नहीं होना कषाय है ३ अखंडवस्तुके अवलंबन (प्राप्ति) हुए विनाही चित्तकी वृत्तिको सविकल्प आनन्द अर्थात् ब्रह्माहमस्मि इत्यादिक विकल्प आनन्दके स्वादको रसास्वाद कहतेहैं अथवा समाधिके आरंभसमयमेंही यह सविकल्प आनन्दके स्वाद होनेको रसास्वाद विघ्न जानो ४। मैत्री १ करुणा२ मुदिता३ उपेक्षा ४ ये चार मैत्री आदिक हैं ॥ १३ ॥

जरायुजांडजस्वेदजोद्भिज्जानि भूतग्रामचतुष्टयम् ॥ १४ ॥ ब्रह्मविद्वरवरीयोवरिष्ठा इति ब्रह्मविदादिचतुष्टयम् ॥ १५ ॥ अन्नमयप्राणमयमनोमयविज्ञानमयनंदमयाः पंच कोशाः ॥ १ ॥ श्रोत्रत्वचक्षुर्जिह्वाघ्राणानि ज्ञानेंद्रियपंचकम् ॥ २ ॥ शब्दस्पर्शरूपरसगंधाः शब्दादिपंचकम् ॥ ३ ॥ वाक्पाणिपादपायूपस्थाः कर्मेंद्रियपंचकम् ॥ ४ ॥ वचनादानगमनविसर्गानंदाः वचनादिपंचकम् ॥५॥ प्राणापानव्यानोदानसमानाः पंचप्राणाः ॥ ६ ॥ नागकूर्मकृकलदेवदत्तधनंजयाः पंचोपवायवः ॥ ७ ॥ नित्यनैमित्तिकप्रायश्चित्तकाम्यनिषिद्धानि कर्मपंचकम् ॥ ८ ॥

भा०—जरायुज, अंडज, स्वेदज, उद्भिज्ज, यह भूतग्रामचतुष्टय कहाहै ॥ १४ ॥ ब्रह्मवित् १ ब्रह्मविद्वर २ ब्रह्मविद्वरीय ३ ब्रह्मविद्वरिष्ठ ४ ये ब्रह्मवित् आदि ४ हैं अर्थात् उत्तरोत्तर श्रेष्ठ हैं ॥ १५ ॥ अन्नमय, प्राणमय, मनोमय, विज्ञानमय, आनंदमय, ये पांच कोश हैं ॥ १ ॥

श्रोत्र१ त्वचा २ चक्षु ३ जिह्वा ४ (नासिका) घ्राण ५ ये पांच ज्ञान इंद्रिय हैं ॥२॥ शब्द, स्पर्श, रूप, रस, गंध ये शब्दादिक पांच हैं (अर्थात् इन इंद्रियनके विषय हैं) ॥ ३ ॥ वाणी, हाथ, पैर, गुदा, लिंग, ये पांच कर्म इंद्रिय हैं ॥ ४ ॥ वचन, आदान, (ग्रहण करना) गमन, विसर्ग (मलत्याग) आनंद, ये वचन आदिक पांच हैं अर्थात् इन कर्मइंद्रियनके विषय हैं ॥ ५ ॥ प्राण, अपान, व्यान, उदान, समान, ये पांच प्राण हैं ॥ ६ ॥ नाग, कूर्म, कृकल, देवदत्त, धनंजय, ये पांच उपवायु हैं ॥ ७ ॥ नित्य, नैमित्तिक, प्रायश्चित्त, काम्य, निषिद्ध, ऐसे पांच प्रकारके कर्म होते हैं ॥ ८ ॥

नित्यानि अकरणे प्रत्यवायसाधनानि संध्यावंदनादीनि १ नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि २ प्रायश्चित्तानि पापक्षयसाधनानि कृच्छ्रचांद्रायणादीनि ३ काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि ४ निषिद्धानि नरकाद्यनिष्टसाधनानि ब्रह्महत्यादीनि इति विवेकः ॥ शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रगंधतन्मात्राणि सूक्ष्मभूतानि पंच ९ पंचीकृतानि पृथिव्यप्तेजोवाय्वाकाशानि पंच स्थूलभूतानि ॥१०॥ अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः पंचयमाः ॥ ११ ॥ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि पंच नियमाः ॥ १२ ॥

---

१ आकाशवाय्वग्निजलपृथिव्य इति । २ पंचीकृतानीति द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंचते इति १ पंचीकरणम् ॥

